# Code No. 3308

**CLASS : 9th (Ninth)** **Series : 9/Annual Exam.-2026**

रोल नं० 

## संस्कृत

(Only for Fresh/School Candidates)

*समय : 3 घण्टे]* *[ पूर्णांक : 80*

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 8 तथा प्रश्न 15 हैं।*
- *प्रश्न-पत्र में सबसे ऊपर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठान् अंकान् प्राप्तये पठनीयः लेखः अपेक्ष्यते।*

### खण्डः 'क'

### (अपठित-अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत –

एकस्मिन् वने एकः विशालः वटवृक्षः तिष्ठति स्म। तस्मिन् अनेके खगाः न्यवसन्। ते भोजनार्थं प्रतिदिनम् इतस्ततः गच्छन्ति स्म। एकदा व्याधेन तण्डुलान् क्षिप्त्वा पाशः प्रसारितः। तण्डुलान् खादितुं खगाः अधः आगत्य जाले बद्धाः अभवन्। खगा अपि विमृश्य मित्रैः सह सजालम् उड्डीय मित्रं मूषकं हिरण्यकम् उपागच्छन्। मूषकः जालम् अकर्तत्। ते स्वतन्त्रताम् आप्नुवन्।

***प्रश्नाः –***

(अ) एकपदेन उत्तरत (केवलं ***प्रश्नद्वयम्***) – $2 \times 1 = 2$

(i) वटवृक्षः कीदृशः आसीत् ?

(ii) खगाः किमर्थम् इतस्ततः गच्छन्ति स्म ?

(iii) खगाः काम् आप्नुवन् ?

P. T. O.



www.mseducationtv.com

2 × 2 = 4

(ब) पूर्णवाक्येन उत्तरत (केवलं *प्रश्नद्वयम्*) –

(i) कान् खादितुं खगाः जाले बद्धाः अभवन् ?

(ii) मूषकः किम् अकरोत् ?

(iii) व्याधेन किं कृत्वा पाशः प्रसारितः ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

(द) यथानिर्देशम् उत्तरत (केवलं *प्रश्नत्रयम्*) – 3 × 1 = 3

(क) 'अभवन्' इति पदे कः लकारः वर्तते ?

(i) लट् लकारः (ii) लोट् लकारः

(iii) लङ् लकारः (iv) विधिलिङ् लकारः

(ख) 'मित्रैः' इति पदे का विभक्तिः अस्ति ?

(i) तृतीया (ii) सप्तमी

(iii) प्रथमा (iv) चतुर्थी

(ग) 'वटवृक्षः' इति विशेष्यपदस्य विशेषणपदं किम् ?

(i) पाशः (ii) विशालः

(iii) मूषकः (iv) खगाः

(घ) 'आगत्य' इति पदे कः प्रत्ययः प्रयुक्तः ?

(i) क्त्वा (ii) तुमुन्

(iii) शानच् (iv) ल्यप्

## खण्डः 'ख'

## (रचनात्मक-कार्यम्)

**2.** (क) प्रधानाचार्यं प्रति अवकाशार्थप्रार्थनापत्रस्य रिक्तस्थानानि मञ्जूषापदैः पूरयत – 5 × 1 = 5

सेवायाम्,

प्रधानाचार्यः महोदयः,

रा० व० मा० विद्यालयः,

जयपुरनगरम्।

सविनयं निवेदनम् अस्ति यत् मम (i) ………… विवाहः मार्चमासस्य सप्तम्यां तिथौ भविष्यति। अहमपि (ii) ………… गमिष्यामि। वरयात्रा (iii) ………… गमिष्यति। कृपया (iv) ………… अवकाशं दत्त्वा अनुगृह्णातु। भवताम् महती अनुकम्पा भविष्यति।

भवदीयः शिष्यः

(v) ………… ।

अनुक्रमाङ्कः एकः

कक्षा नवमी

*मञ्जूषा*

| दिवाकरः, दिनद्वयस्य, दिल्लीनगरम्, अग्रजस्य, तत्र |
|---|

www.mseducationtv.com

(ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत – 5 × 1 = 5



(1) इदं चित्रम् ............ अस्ति।
(2) ............ मित्रैः सह कन्दुकेन क्रीडन्ति।
(3) एका ............ रज्ज्वा क्रीडति।
(4) दम्पती परस्परं ............ कुरुतः।
(5) उद्यानम् अतीव ............ अस्ति।

*मञ्जूषा*

| बालकाः, उद्यानस्य, वार्तालापं, कन्या, रमणीयम् . |
|---|

**खण्डः 'ग'**

**(पठित-अवबोधनम्)**

**3.** निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत – 1 × 4 = 4

तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा न्यवसत्। तस्या अपि एका पुत्री आसीत्। ईर्ष्यया सा तस्य स्वर्णकाकस्य रहस्यं ज्ञातवती। सूर्यातपे तण्डुलान् निक्षिप्य तयापि स्वसुता रक्षार्थं नियुक्ता। तथैव स्वर्णपक्षः काकः तण्डुलान् भक्षयन् तामपि तत्रैवाकारयत्। प्रातस्तत्र गत्वा सा काकं निर्भर्त्सयन्ती प्रावोचत् – "भो नीचकाक! अहमागता, मह्यं तण्डुलमूल्यं प्रयच्छ।"

**अथवा**

प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते। इयं सर्वान् पुष्णाति विविधैः प्रकारैः, सुखसाधनैः च तर्पयति। पृथिवी, जलम्, तेजः, वायुः, आकाशः च अस्याः प्रमुखानि तत्त्वानि। तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरण रचयन्ति। आव्रियते परितः समन्तात् लोकः अनेन इति पर्यावरणम्। यथा अजातशिशुः मातृगर्भे सुरक्षित तिष्ठति तथैव मानवः पर्यावरणकुक्षौ।

P. T.



www.mseducationtv.com

$1 \times 4 = 4$

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत -

गुणा गुणज्ञेषु गुणा भवन्ति,
ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः,
समुद्रमासाद्य भवन्त्यपेयाः।।

**अथवा**

सा तदा करुणा वाचो विलपन्ती सुदुःखिता।
वनस्पतिगतं गृध्रं ददर्शायतलोचना।।

**5.** अधोलिखितासु सूक्तिषु मात्र ***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लिखत - $2 \times 2 = 4$

(क) परोपकाराय सतां विभूतयः।

(ख) छायेव मैत्री खलसज्जनानाम्।

(ग) नास्त्यभावो जगति मूर्खाणाम्।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचित पदानि चित्वा पूरयत -

पिबन्ति नद्यः स्वयमेव नाम्भः,
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः।।

अन्वयः -

नद्यः (1) ............ अम्भः न पिबन्ति, (2) ............ स्वयं फलानि न खादन्ति। वारिवाहाः खलु (3) ................ न अदन्ति। सतां (4) ............ परोपकाराय (भवन्ति)।

***मञ्जूषा***

| |
|---|
| **वृक्षाः, सस्यं, स्वयमेव, विभूतयः** |

**6.** अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत (केवलं ***प्रश्नत्रयम्***) - $3 \times 1 = 3$

भ्रान्तः कश्चन बालः पाठशालागमवेलायां क्रीडितुम् अगच्छत्। किन्तु तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतः ते सर्वेऽपि पूर्वदिन पाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणाः अभवन्। तन्द्रालुः बालः लज्जया तेषां दृष्टिपथमपि परिहरन् एकाकी किमपि उद्यानं प्राविशत्।



www.mseducationtv.com

*प्रश्नाः* -

(क) श्रान्तः कः आसीत् ?

(ख) बालः कदा क्रीडितुम् अगच्छत् ?

(ग) सर्वे कुत्र गमनाय त्वरमाणाः अभवन् ?

(घ) सः एकाकी कुत्र प्राविशत् ?

7. निम्नलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन पूर्णवाक्येन लिखत (केवलं *प्रश्नद्वयम्*) - 2 × 1 = 2

वसन्ते लसन्तीह सरसा रसालाः,
कलापाः ललित-कोकिला-काकलीनाम्।

*प्रश्नाः* -

(क) सरसा रसालाः कदा लसन्ति ?

(ख) वसन्ते के लसन्ति ?

(ग) केषां कलापाः विलसन्ति ?

8. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत (केवलं *प्रश्नत्रयम्*) - 3 × 1 = 3

(क) बालिकया <u>लोभस्य</u> फलं प्राप्तम्। (के, कस्य)

(ख) <u>खलानां</u> मैत्री आरम्भगुर्वी भवति। (किम्, केषाम्)

(ग) त्वदीया <u>तुला</u> मूषकैर्भक्षिता। (का, केन)

(घ) <u>तपोदत्तः</u> कुटुम्बिभिः गर्हितः अभवत्। (कः, कान्)

(ङ) <u>वनवृक्षाः</u> निर्विवेकं छिद्यन्ते। (के, कस्मात्)

9. प्रश्नपत्रे लिखितश्लोकान् विहाय *'शेमुषी भाग-1'* पुस्तकाद् *एकं* कण्ठस्थं श्लोकं संस्कृतभाषया लिखत। 1 × 4 = 4

## खण्डः 'घ'

## (अनुप्रयुक्त-व्याकरणम्)

10. (क) व्यंजनसन्धेः *अथवा* गुणसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1 × 2 = 2

(ख) अव्ययीभावसमासस्य *अथवा* द्वन्द्वसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1 × 2 = 2

(ग) करणकारकस्य *अथवा* अपादानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1 × 2 = 2

P. T. O.



www.mseducationtv.com

**11.** यथानिर्दिष्टानि शब्दरूपाणि लिखत (केवलं *प्रश्नचतुष्टयम्*) – 4 × 1 = 4

(क) 'राम' शब्दस्य तृतीया – एकवचने।

(ख) 'देव' शब्दस्य द्वितीया – बहुवचने।

(ग) 'रमा' शब्दस्य तृतीया – एकवचने।

(घ) 'कवि' शब्दस्य प्रथमा – द्विवचने।

(ङ) 'साधु' शब्दस्य षष्ठी – एकवचने।

**12.** यथानिर्दिष्टानि धातुरूपाणि लिखत (केवलं *प्रश्नचतुष्टयम्*) – 4 × 1 = 4

(क) 'भू' धातोः लट् लकारस्य प्रथमपुरुष – एकवचने।

(ख) 'लिख्' धातोः लोट् लकारस्य उत्तमपुरुष – बहुवचने।

(ग) 'गम्' धातोः लङ् लकारस्य प्रथमपुरुष – द्विवचने।

(घ) 'पा' (पिब्) धातोः लृट् लकारस्य मध्यमपुरुष – एकवचने।

(ङ) 'सेव्' धातोः लट् लकारस्य प्रथमपुरुष – एकवचने।

**13.** प्रदत्तोपपदविभक्ति वाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत (केवलं *प्रश्नत्रयम्*) – 3 × 1 = 3

(क) सीता ................ सह वनं गच्छति। (रामेण, रामाय)

(ख) बालकः ............ काणः अस्ति। (नेत्राभ्याम्, नेत्रेण)

(ग) .............. फलं रोचते। (मोहनम्, मोहनाय)

(घ) ............... परितः वृक्षाः सन्ति। (ग्रामं, ग्रामस्य)

(ङ) अलम् .............. । (विवादम्, विवादेन)

**14.** निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत (केवलं *प्रश्नद्वयम्*) – 2 × 1 = 2

(क) विलोक्य

(ख) परिहरन्

(ग) प्रददाति

## खण्डः 'ङ'

### (पाठाधारिताः बहुविकल्पीयाः प्रश्नाः) 17 × 1 = 17

**15.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिक चतुर्भ्यः उत्तरेभ्यः एकं *शुद्धम्* उत्तरं चित्वा लिखत –

(क) 'अत्र + एव' इत्यत्र किं सन्धिपदम् ?

(i) अत्रेवः
(ii) आत्रेव
(iii) अत्रैव
(iv) अत्रएव



www.mseducationtv.com

(ख) 'स्नान्नार्थम्' इत्यत्र कः सन्धि विच्छेदः ?

(i) स्नान + अर्थम्
(ii) स्ना + अर्थम्
(iii) स्थान + अर्थम्
(iv) स्नान + रथम्

(ग) 'पुस्तकदासाः' इति पदे कः समासः ?

(i) कर्मधारयः
(ii) तत्पुरुषः
(iii) द्विगुः
(iv) द्वन्द्वः

(घ) 'दिनं दिनं प्रति' इत्यस्य समस्तपदम् ?

(i) प्रतिदिनः
(ii) प्रतिदिनम्
(iii) दिनप्रति
(iv) दिनंप्रति

(ङ) 'प्राचीनम्' इत्यस्य पदस्य विलोमपदं किम् ?

(i) मधुरम्
(ii) मृदुम्
(iii) सरसम्
(iv) नवीनम्

(च) 'आर्य' इत्यस्य पदस्य विलोमपदं किम् ?

(i) वृद्धः
(ii) अनार्य
(iii) आर्यम्
(iv) श्रेष्ठम्

(छ) 'शिशुः' इति शब्दस्य पर्यायपदम् –

(i) जनकः
(ii) पितरः
(iii) बालकः
(iv) वणिजः

(ज) 'वैदेहीम्' इत्यस्य शब्दस्य पर्यायपदम् –

(i) विदेहम्
(ii) जानकीम्
(iii) जनकम्
(iv) पुत्रीम्

(झ) 'रुद् + तुमुन्' इत्यस्य संयोगे किं रूपम् ?

(i) ऐतुम्
(ii) रुद्नम्
(iii) रोदितुम्
(iv) रोतुम्

(ञ) 'निरीक्ष्य' इत्यस्मिन् पदे कः प्रत्ययः ?

(i) क्त्वा
(ii) तुमुन्
(iii) शतृ
(iv) ल्यप्

(ट) 'पञ्चदश' इत्यस्मिन् पदे का संख्या ?

(i) 15
(ii) 50
(iii) 55
(iv) 65

P. T. O.



www.mseducationtv.com

(ठ) '70' अङ्कस्थाने किं संख्यावाचीपदम् ?

(i) सप्दश (ii) षोडश

(iii) सप्ततिः (iv) पञ्चाशत्

(ड) 'लुब्धया बालिकया' अत्र किं विशेष्यपदम् ?

(i) बालिका (ii) लुब्धया

(iii) बालिकया (iv) लुब्धा

(ढ) 'महाबलः जटायुः' अत्र किं विशेषणपदम् ?

(i) जटायुः (ii) खगोत्तमः

(iii) बलशाली (iv) महाबलः


(ण) 'दिनस्य' इत्यस्मिन् पदे का विभक्तिः ?

(i) षष्ठी (ii) प्रथमा

(iii) द्वितीया (iv) तृतीया

घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृत पदेन पूरयत –


(त) रामः प्रातः .............. उत्तिष्ठति।




(i) पञ्चवादने (ii) नववादने

(iii) अष्टवादने (iv) सप्तवादने

(थ) रमेशः ............... वादने विद्यालयं गच्छति।




(i) चतुर्वादने (ii) त्रिवादने

(iii) पञ्चवादने (iv) दशवादने



www.mseducationtv.com